तथाऽनुत्पादादित्यादि, अनुक्तेः शून्यत्ववदनुत्पादादपि वस्तुनः शून्यत्वं प्राप्नोति वस्तुवादिनः, उत्पत्तिविनाशयोरसत्त्वेऽनुत्पन्नाविनष्टत्वात् खपुष्पवदित्युपसंहरिष्यमाणशून्यत्वात्, आद्यन्तयोर्भावाभावयोरनुत्पादादसिद्धिरिति,—तत्रापि उत्पत्तिः अन्तः क्षयः, तावाद्यन्तौ विशेषाणाम्, न चेति द्वौ विकल्पौ च, तयोः कतरमिच्छसि? यदि नाम नेतीच्छसि ततोऽसत्त्वे तयोः सर्वभावानामनाद्यन्तत्वाद्घटादीनां नित्यता स्यात् खादिरेव, सा च प्रत्यक्षादिविरुद्धा स्थितिः, उत्पत्तिविनाशदर्शनात्, प्रत्यक्षपूर्वकत्वादनुमानादीनामनुमानादिभिरपि विरुध्येत किञ्चान्यत्—स्थितवस्तुविपरीतत्वादवस्तु,—उत्पन्नमवस्तु प्राप्नोति, स्थितवस्तुविपरीतत्वात्, खपुष्पवत्, किञ्चान्यत्—अनुत्पन्नमेव सर्वं वस्त्वित्यभ्युपगमे सर्वसिद्धान्तव्याघातश्च, वैशेषिकसिद्धान्ते तावदुत्पत्तिमभ्युपेत्योक्तं 'द्रव्याणि द्रव्यान्तरमारभन्ते गुणाश्च गुणान्तरम्।' 'क्रियागुणव्यपदेशाभावात्प्रागसत्' (वै० अ १ आ १ सू १) इत्यादि प्रागसत्कार्योत्पत्तिव्याख्यानात्।

अत्राह तेनोक्तः सर्वसिद्धान्तव्याघातोऽनुत्पादाभ्युपगमेनेति तदयुक्तम्—तिष्ठतु तावत् पुरुषादिवादाः, सांख्यानामेव तावत् सत्कार्यवादित्वाद्व्याघात इत्यत्र ब्रूमः यत्तत्रभवता तावत् प्रत्युच्चारयामः। तद्यथा—

अथोच्येत सांख्यानामेव तावत् सत्कार्यवादित्वाद्व्याघात इति, नाव्याघातः, कथम् सत्कार्यानभ्युपगमात्? प्रधानादीनां नित्यनिष्ठितत्वाभ्युपगमात्, अतस्तान्यारब्धान्येव, निष्ठितत्वात्, घटवत्, आरब्धत्वात् कृतकानि कृतकत्वात् पर्यवसानवन्त्यपि, यस्यैव न भवति तत् खपुष्पवदसत् स्यात्, अथ त्वेवमपि नैषाभ्युपगम्यत आरम्भादि तथाऽनिर्वृत्तमनिष्ठितमसत् स्यात्, आकाशवत्।

अथोच्येत सांख्यानामेवेत्यादि, तस्योत्तरं—नाव्याघात इत्यादि, नाव्याघातो व्याघात एव,

व्याख्ये—अनुक्तेरिति अनुक्त्या यथा अपदार्थतापादर्थानां शून्यता निरूपिता तथाऽनुत्पादादपि वस्तुवादिनः सांख्यादेः प्रधानादीनामाद्यन्ताभावे खपुष्पवदसत्त्वं सामीप्यमे उपसंहरिष्यते तथा शून्यत्वं प्राप्नोतीति भावः। उक्तविवरणार्थं मतिप्रणीत—आद्यन्तयोरिति। आद्यन्तशब्दार्थमुक्त्वा विचारार्थं विकल्पमुपस्थापयति—तत्रापीति उत्पत्तिविनाशयोः सत्त्वमसत्त्वं वेति विकल्पार्थः। उत्पत्तिविनाशयोः विचार्य प्रथमं तदसत्त्वपक्षं विचारयति—यदि नामेति। यदि सर्वभावानामुत्पादविनाशौ न स्यातां तदाऽनाद्यन्तत्वादिसत्ता सदावस्थानरूपा घटादीनां स्यात्, सा चोत्पत्तिविनाशदर्शनप्रत्यक्षविरोधात् विरुध्यत इत्याह—ततोऽसत्त्व इति। अनुमानादिविरोधमाह—प्रत्यक्षेति। उत्पत्तिविनाशवद्घटादीनां विनाशमानापेक्षायां भवत् स्थितवस्तुविपरीतं तदवस्तु स्यात्, यथा खपुष्पादि, स्थितवस्तुविपरीतयोरुत्पत्तिविनाशयोरपि भवादि, ततोऽवस्तु स्यादिति दोषान्तरमाह—स्थितवस्तुविपरीतत्वादिति निगमनम् एतदर्थे। उत्पादविनाशयोरनभ्युपगमे सर्वं वस्तु अनुत्पन्नमिति स्यात्, तथा च सर्वसिद्धान्तव्याघात इत्याह—अनुत्पन्नमेवेति। वैशेषिकसिद्धान्तेऽसत्कार्यवादव्याख्याने उत्पत्तिमभ्युपेत्य निरूपणं 'द्रव्याणि द्रव्यान्तरमारभन्ते' इत्यादिसूत्रे प्रदर्शितमसत्कार्यवादाश्रयं दर्शयति—वैशेषिकसिद्धान्त इति। अथ सिद्धान्तवादी प्राह—तेनोक्तः सर्वसिद्धान्तव्याघातो नास्माकं दोषः अनुत्पादानभ्युपगमवादिनां दर्शयति—अत्राहेति। तदसत्पूर्वपक्षं तस्य व्याघाते दर्शयन्—तिष्ठत्विति। अथ मूलाभिप्रायेण सांख्यपक्षमाह—अथोच्येतेति। तस्योत्तरं विवृणोति—नाव्याघात इति युष्माकं सर्वसिद्धान्तव्याघात इति न किन्तु व्याघात एवेत्यर्थः। कथमस्माकं व्याघातः न हि वयमसत्कार्य-

१ सि. क्ष छा. ड. °वस्तुव्याधिपरीत्य । २ सि. क्ष डे. ड लेखोक्तं।

हि प्रतिषेधस्य प्रसक्तापेक्षा, कथमसत्प्रधानाभ्युपगमादिति, उच्यते, प्रधानादीनां नित्यनिष्क्रियत्वाभ्युपगमात्—नित्यं निष्क्रियमेव प्रधानमदृष्टकारणमित्यभ्युपगमाद्वारम्भ सर्वमित्यभ्युपगमादारम्भोऽभ्युपगमो भवत्वारम्भमन्तरेण क्रियाभावात्, क्रियामन्तरेण च निष्पत्त्यभावात्, वस्तुसंक्षेपेण साधनमाह—अवस्तूनि मानि तानि प्रधानादीन्यारम्भाभावेन, निष्क्रियत्वात्, व्योमवत्, घटनिष्पत्तिक्रियारम्भाभावो लोकप्रसिद्धत्व-दुदाहरणसिद्धेः प्रधानादीनां वस्तुत्वसिद्धिः, एवमारम्भस्यात् तदभावसिद्धिः, तथा स्वरूपस्यात् स्वप्रधानमपि तथाप्रयत्नाः प्रधानादयः पक्षेऽत्र न भवतीति वैधर्म्यदृष्टान्तः, साधनान्तरं वा गगनमात्मवत्त्वाभावे खपुष्पवदसत्त्वापादनं प्रधानादीनाम् आदिमत्त्वात् पुरुषादिष्वपि प्रसङ्गः समानधर्मा, अनेनैव साधनेन गतार्थत्वेऽप्युपपत्त्यन्तरनिराकरणार्थमाकाशदृष्टान्तेनानिष्टापादनसाधन—अथ स्वेच्छयापि नैवाभ्युपगम्यत आरम्भादीन्यपि वास्तवानीति ।

आह—

नन्वाख्यार्थं शुक्तिरजतपदाभ्यामभिहितं निश्चितं सर्वत्र प्रमाणज्ञानविषयत्वेनोच्यते कुतोऽस्य शुक्तिरजतता? आङीषदर्थे उपसर्गः, काशृ दीप्ताविति धातुः, आकाशत इत्याकाशम् 'कुगतिप्रादयः' (पा २-२-१८) इति समासत्वात् मृगतृष्णिकावदाभासत इत्याकाशमिति विज्ञानस्यैव तथावभासः । यदि च ख्यातिशून्यपदार्थप्रतिपत्तिं कुर्मस्ततो विज्ञानमात्रमेवेदं सर्वमिति नाभ्युपगच्छेम अस्मत्पक्षे हि विषयभूतान्यस्मद्योमभावाच्छून्यघटपटादिविषयाण्यपि विज्ञानमात्राणीति अनेन सर्वे शब्दा विज्ञानाधाननिमित्तमात्रत्वात्तथ्या एव ।

तत्सम्मुखेन वैशेषिकस्यावश्य आकाशोऽभ्युपगतस्तदनुपपन्ने साधित्वमाह उच्यते—कथमिति । प्रधानादीनामारम्भस्य वास्तवी—प्रधानादीनामिति प्रधानादयः प्रकृतयः प्रकृतीनां तत्कर्तृत्वाद्यनुपपन्नावित्यनिष्क्रियत्वात्, प्रधानस्य प्रकृतिमात्रेण नित्यनिष्क्रियत्वम्, तत्र पुरुषस्य विभुत्वेनाविक्रियत्वादिनिष्क्रियत्वमिति भाव । एवम् आरम्भस्याप्यवस्तुत्वम् निष्क्रियत्वेऽनुपपन्नत्वाद् निष्क्रियस्य क्रियामन्तरेण क्रियाभावादारम्भस्याप्यभावात् तदारम्भोऽनुपपन्न एव भवतीत्याह—नित्यं निष्क्रियमेवेति । एतदेव प्रकटयति साधयति—अवस्तूनीत्यादीति यत्र यत्र निष्क्रियत्वं तत्र तदारम्भो न यथा व्योमे तदारम्भं तदभावम्, व्योम्नः कार्यं तत्कर्तृत्वमपि सर्वत्र च एव निर्वचनम्, निष्पन्नक्रियाऽऽरम्भाभावो व्योमवदिति विवक्षानुसरणम्, एवमारम्भाभावसिद्धौ हेतुना तेषां प्रधानादीनामुपगम सिद्ध इति भाव । तदवस्थापिनीमित्याह एवमारम्भस्यापीति । एवं प्रधानादीनामारम्भवत्त्वं निराकृतम्—तथापीति निष्पन्नक्रियारम्भात्कर्तृत्वनिराकरणम् । प्रधानारम्भावस्तुत्वमपि न भवति तत्स्वरूपेण, खपुष्पवदिति वैधर्म्यनिदर्शनमित्याह—पक्षेऽत्रेति । अन्यथा वस्तुत्वं हि तदन्यस्मारम्भाभावेन साध्यमानेन हेतुना भवति यत्र क्रियते तद्वैधर्म्यदृष्टान्त उपपत्त्याभावेन निष्क्रियत्वेन विशेषोपपत्तिः अत्र वैधर्म्यदृष्टान्तोऽभिमतस्तदाह—साधनान्तरं वेति अवस्तुत्वमपि तथात्वं यथा खपुष्पादि, आकाशवत्त्वाभावे प्रधानादीनामभिमतं तथैव विवक्षितं तेषामिति भाव । एवं पुरुषस्याप्यारम्भवत्त्वं सिद्धमिति सूचयति—आदिमत्त्वादिति, प्रधानादीनामिवारम्भाभावादिति । ननु सर्वोत्पत्तिमति बौद्धमते आरम्भादि भवति च तत्र ते न समारम्भाः अवस्तव तथापि तदारम्भाभावमात्रेऽपि तत्स्वेन एवं प्रधानादि साधितेऽप्युपपत्त्यन्तरं निराकर्तुमाह—अनेनैवेति आवस्तुत्वस्याप्युपपत्तेः प्रधानादीनां खपुष्पवदसत्त्वापादनेनैव सिद्धत्वादनुपपत्तिः । अभिप्रायमाह अथ स्वेच्छयापीति निष्क्रियत्वारम्भाभावाभावे क्रियापि यदि तदेव सर्वोत्पत्तिमत् अनिष्ट-मनिष्टमसत् तत्सिद्धम् आरम्भाभावेन तदवस्तुत्वं वस्तुत्वं वैलक्षण्याभावो दृष्टान्त इति भाव । नन्वाख्यार्थं शुक्तिरजतपदाभ्यामिति । नन्वाख्यार्थं निश्चितं सर्वत्र प्रमाणम्, ज्ञानविषयत्वम्, प्रमाणज्ञानम्

नन्वाकाशमित्यादि, आकाशस्यासिद्धिप्रदर्शनार्थमनुमानम्, युगपदवाच्यत्वादिति निश्चित मतेऽपि यत्, प्रमाणमात्रमनपेक्षितत्वेनोच्यते—कुतोऽस्य युगपदवेति हेत्वसिद्ध्यापादनम्, तस्य समासपदत्वा दसत्यपि—आक्षेपदर्थं उपमन्युः खपुष्पं शीतादिति मातुः, आकाशस्य इत्याकाशम्। 'कुगतिप्रादयः' (पा० २–२–१८) इति समासत्वात्, कोऽस्यार्थ इति तत्प्रदर्शनार्थमाह—मृगतृष्णिकावदाभासत्व इत्याकाशमिति—यथा मृगतृष्णिका अनर्थत्वेनासती तद्वदाभासते तथाऽऽकाशमप्यविद्यमानं विद्यमानवद्विज्ञानेन गृह्यते, विज्ञानस्यैव तथा तथोत्पादात्, स्वन्मत उपचिक्रमोमादिषु युगपद्वाच्यत्वासिद्धिरिति, एतदायुक्तम्, यदि च व्याप्तियुगपदर्थेत्यादि, यदि यत्र युगपदवाच्यमपि शब्दार्थं प्रतिपद्येमहि ततो विज्ञानमात्रमेवेदं सर्वमिति नाभ्युपगच्छेम—न ब्रूयाम, अस्माकं हि विपद्गगनपांसुव्योममायाशून्यपटपठादिशब्दानामपि विज्ञानव्यतिरिक्तो नैवार्थोऽस्तीति सिद्धम् तत्प्रतिपादनार्थं च यतिष्यामहे, अनन्त्यादि, एतेन व्याप्तियुगपदवाच्यत्वापेन सर्वे शब्दाः क्रियाकारकसम्बन्धार्थवाचिन एवेति नैरुक्तमभिमतानां व्युत्पत्तिपक्षे पाददिकशब्दानां वाऽव्युत्पत्तिपक्षे डित्थादीनां नमादिप्रतिषेधसहितानां पदसमानां वा न कश्चिद्विद्यतेऽर्थस्तस्मात् विज्ञानाधाननिमित्तमात्रत्वात्सर्वार्था एव सर्वशब्दा इति।

युगपदवाच्यत्वासमानत्वात् तस्य प्रमाणभूतं ज्ञानं युगपदवाच्यत्वादिति यत् प्रमाणमनपेक्षितत्वे—युगपदवाच्यत्वादिति। अथाऽऽकाशस्य युगपदवाच्यत्वमसिद्धमसमासत्वादपि समासवाक्यत्वात् कुतोऽस्येति। आक्षेपदर्थ इत्यादि शीतादिरत्र मृगतृष्णिकावदाभासमानमिति व्युत्पत्तिमात्रपदस्य दर्शयति—आक्षेपदर्थ इति। कुगतिप्रादय इति सूत्रेण समासप्राप्तत्वेन प्रतिपादकत्वार्थसमासे वैयाकरणैः कुगतीति युगपदो नविशेषस्य उपमन्युरूपेण समासेन समस्तत्वम् इति तदर्थे। अत्र दृष्टान्तमाह—मृगतृष्णिकेति। तदेव प्रदर्शयति—यथेति। मृगतृष्णिका अनर्थत्वेनासती जलत्वेनाभासते तथाऽऽकाशमपि [illegible] तथा तथोत्पादात्, नीलपीतादितत्तदाकारत्वेन प्रति-भासमानं [illegible] नीलपीतादयः [illegible] न तु [illegible] विज्ञानव्यतिरिक्ता [illegible] विज्ञानस्य तथोत्पादादिति भावः। स्वन्मतम-तस्य [illegible] युगपदवाच्यत्वासिद्धिः [illegible] स्वन्मतमिति। यद्यपि—यदि चेति [illegible] येन [illegible] स्यात्, [illegible] विज्ञानमात्रमिदं सर्वमिति [illegible] न तु [illegible] 'विज्ञानमेव सर्वम्'। विज्ञानमेव हि [illegible] विज्ञानमेव' इति [illegible] भावः। शब्दानामपि विज्ञानमात्रं इत्याह अस्माकं हीति। [illegible] सर्वे शब्दा व्युत्पन्ना एवेति [illegible], व्युत्पन्नत्व क्रियाकारकसम्बन्धाभिधायित्वसमुदायम्, यथा [illegible] इत्यादि, [illegible] न [illegible] युगपदवाच्यत्वं न [illegible] इत्यादि [illegible] विज्ञानमात्रत्वात् [illegible] इति भावः। [illegible]

1 सि. क्ष. डे. व. [illegible]।

अथ मा भूद्विज्ञानमात्रताप्रसङ्ग इत्यन्यथाऽऽविः प्रधानादिरिष्यते पूर्वप्रत्युपसंहारसमाहितत्वादिति स सोपसंहारः किं नित्यः ? उतानित्यः ? यथादिनित्यस्तथा दोषाभिव्यक्तिरिष्यते ततः पूर्वोक्त एव दोषो भावविज्ञानमात्रार्थता, अथानित्यस्तथाप्यसत्त्वमेव ।

अथ मा भूदित्यादि, सामर्थ्यं विविक्तरसादेर्विज्ञानमात्रताप्रसङ्गः, स मा भूदित्यन्यथाऽऽविरिष्यते, कः ? प्रधानादिः प्रधानपुरुषब्रह्मस्वभावादि तदेव च कारणं तन्मात्रमेव घटपटादिकार्यम्, कस्मात् ? पूर्वप्रत्युपसंहारसमाहितत्वात्—कार्यात् प्रागपि तस्मिन्नेव प्रधानाद्यव्यक्तकारणमात्रे समाहिता एव विकारपर्यन्तमपि प्रवृत्तिर्वाऽऽविर्भाविनः ततो भूतानां विद्यमानानामेव घटादीनां निःसरणमाविः, नारम्भादिरत्र इत्यभिप्रेते—स सोपसंहार इत्यादि, स आविः प्रधानादिकारणस्थः सहोपसंहारेण किं नित्यः ? उत—आहोस्वित् अनित्यः ? इति निर्धार्यः तत्र यदि नित्यस्तस्य आविरेव न भवति, अकृतकत्वात्—अनारम्भकत्वात्, ततः किं ? तदभावाभिव्यक्तिः अनभिव्यक्तत्वादसत् खपुष्पवत् अथाभिनित्यतायामिष्टापि, एतद्दोषभयादभिव्यक्तिश्च पूर्वोत्तरतुल्यकालवृत्तीष्यतेऽतः पूर्वोक्त एव दोषो—नित्यत्वादनारम्भत्वादकृतकत्वादनभिव्यक्तिः खपुष्पवदाभावः तथापीति तदेवास्तित्वेऽपि भावविज्ञानमात्रार्थता पूर्ववदेव सत्त्वानुपपत्तिरिति एवमुत्पत्तिनित्यत्वे विशेषित्वे भासत्वमुक्तम् अथानित्यत्वं विनाशनिश्चयतः तस्मात्यन्तनियमतायामसत्त्वमेव एवमादावेऽनित्यत्वे दोषः ।

अथानित्यत्वे स किं जातः ? किमजातो वा ? यदि जातोऽनुत्पन्नस्तर्हि, जातत्वाद् निर्वृत्तघटवदनुत्पन्नत्वादसन्, अथाजातस्ततोऽप्यनुत्पादः, अजातत्वात्, अनिर्वृत्तघटवत् जाताजातत्वेऽविरोधादुभयपक्षदोषसम्बन्धः भाव, नित्यायामपि किं निश्चितोऽनिश्चितो वा ? यदि निश्चितः अनुत्पादस्तर्हि निश्चितत्वात्, निश्चितघटवत् यद्यनिश्चितस्तथाप्यनुत्पाद एवानिश्चितत्वात्,

तदारम्भार्थं यदन्यत्परं आविरिष्यते तथापि दोषापत्तमेव सहते—अथ मा भूदिति। न्यायो—सामर्थ्यमिति। न चापि तारम्भस्य प्रधानं पुरुष ब्रह्म स्वभावादि वा भवतु तस्मात्मन्तु कार्यमाविरवं प्रधानादिमात्रमेवेत्याह—प्रधानादिरिति। प्रधानादिमात्रमेव सर्वं कार्यजातमित्र हेतुमाह—पूर्वप्रत्युपसंहारेति। पूर्वं प्रागर्थप्रादुर्भावात् प्रत्युपसंहारे—उपसंहारलक्षणे परिणामात्मके प्रवृत्ताके च सर्वेषां विकाराणां महदहङ्कारादीनां तत्र कारणमात्रे समाहितत्वात्—अन्तर्लीनत्वादित्यन्तलीनानामेव महदादीनामभिर्भावात् प्रधानादि नित्यं वस्तु आविर्भवति न तस्य आरम्भणादिति भाव । हेतुं व्याचष्टे—कार्यादिति। उपसंहृत प्रधानादि किं नित्य उतानित्य इति प्रश्न महदहङ्कारादिविशिष्टप्रधानादेर्नित्यत्वे कारणत्वमेव न स्यात्, महदादयः स्वभावे हि तत्र कारणत्व स्यात् महदादी च प्रकृत्यन्तर्लीनत्वेन तद्विशिष्टप्रधानादेर्नित्यत्वाभ्युपगमाद नारम्भकत्वम् अन्तर्लीन महदादेरभिव्यक्तमपि न भवते अन्तर्लीनमहदादित्वस्याभावात्, आविर्भूतमहदादिविशिष्टप्रधानादेर्नित्यत्वे तद्विशिष्ट एव सर्वदाऽऽरम्भ स्यात् यथाकारणं तथैवेत्यपि, अनिश्चितं वस्तुत्वपक्षेऽप्याह—तत्र यदीति। नन्वारम्भकत्वाभावे किं तत्र मा भूत् विशिष्टविशेषत्वं पूर्वोत्तरकालभावित्वं—अभावावस्थत्वं प्रधानादीनामनुपपन्नम् तस्मादप्रसमावर्तनेन—एतद्दोषभयादिति नित्यविशेषाभिव्यक्तिमात्रेऽभिव्यक्तिवस्तुपगमे कारणमात्रनित्यत्वाभ्युपगमे नित्यत्वाभिव्यक्त्यात्मकत्वेन वस्तुत्वासम्भवोऽपि प्रत्युक्तोऽपि भाव । तदभिव्यक्तप्रधानादेर्विशिष्टत्व नित्यत्वे तस्यभिव्यक्तः कारणमारनित्यत्वे निर्विशिष्टवस्तुत्वाभ्युपगमविरोधात् प्रधानादीनामसत्त्वमेवेति दर्शयति एवमिति। विनाशस्य नित्यत्वे तु प्रधानादीनामसत्त्वे तद्भावमाह—अत्यन्तविनाशमिति। दोषान्तरमाह अथानित्यत्वे दोषमाह अथानित्यस्य इति। न्यायोऽपि—

1 नि. छा. द. तदाद्योपविद्यमि ।

अनिर्वृत्तघटवत्, अनिष्ठितश्चासन्, असत्त्वादकर्त्ता, अकर्तृत्वाच्च खपुष्पवन्न निर्वर्त्तयति, नोभय मुक्तवत्, अन्तेऽपि किं विनष्टो विनश्यति, किं वाऽविनष्टः ? यदि विनष्टो विनश्यतीतीष्यते ततोऽनुत्पाद एव विनष्टत्वात् विनष्टघटवत्, नाविनष्टोऽक्षतघटवदभूतविनश्यद्भावत्वादाकाश-वदिति वा, अस्यानुगमं कृत्वा प्रसङ्गः नोभयमुक्तवदिति नोत्पत्तिस्थितिभङ्गाः सिध्यन्ति ततश्च खपुष्पवदभाव एव स्याद्वस्तु ।

अथ[ा]नित्यस्य इत्यादि, भावेर्नित्यत्वे दोष उक्तः तत्प्रतिपक्षार्थमाविरनित्य इतीष्यते तत्र त्रयी गतिः—भावस्य अभावस्य, भावाभावस्य वा, किं भावः ? किमभावः ? इति विकल्पद्वयमभ्यस्य तदर्थयोगस्य तृतीयस्य विकल्पस्य सिद्धः, यदि भाव इत्यादिना द्वयोराद्यविकल्पयोरुत्पादाभावोऽनुत्पन्नत्वादसत्त्वमिति गदार्थम्, भावाभावमेवेति तृतीयविकल्पस्य विरोधादसम्भवः, किञ्चोभयदोष[ा]नन्याय—यो भावस्य दोषो यश्चाभावत्वे ताभ्यां युक्तो भावाभावपक्षोऽवश्यम्भावी, एवमुत्पादे दोषाः, स्थित्यामपीत्यादि, किं निष्ठितोऽनिष्ठितो निष्ठितानिष्ठितो वेति त एव विकल्पाः, तेष्वपि त्रिषु दोषा उत्पादपक्षोक्तन्यायेन नीता एव यावन्नोभयमुक्तमिति अनिष्ठितोऽसन्नसत्त्वादकर्त्ता, अकर्तृत्वाच्च खपुष्पवन्न निर्वर्तयतीति विशेषो गदार्थः, अन्तेऽपीत्यादि, विनाशेऽपि किं विनष्टो विनश्यति ? अविनष्टः ? विनष्टाविनष्टो वा ? यदि विनष्टो विनश्यतीतीष्यते इत्युपक्रम्य त्रिष्वपि विकल्पेषु यावन्नोभयमुक्तमिति, नाविनष्टोऽक्षतघटवदित्यस्य व्याख्यान—अभूतविनश्यद्भावत्वात्—अभूतोऽनुत्पन्नो विनश्यद्भावोऽस्येत्यभूतविनश्यद्भावः, तस्मादभूतविन-श्यद्भावत्वात्, अक्षतघटवदिति आकाशवदिति वा, अभूतविनश्यद्भावत्वादित्यस्यैव हेतोरुदाहरणान्तरम्, अस्यानुगमं कृत्वा प्रसङ्गः, कोऽर्थः ? उत्पत्त्यादिष्वप्येतदित्यादि यावदभिधानमात्रार्थत्वेऽपीति नोभयमुक्तवत्—न

भावेर्नित्यत्व इति भावि प्रधानादिकारणमित्य उत्पत्तिमदिति पक्षे त्रिधा वक्तुं शक्यं, विमुक्तलक्षणभावः किं भावस्य भावेन विमुक्तोऽभावस्य विमुक्तश्चाथ उभयत्र इत्यत्र—तत्र त्रयी गतिरिति। तदेव स्फुटयति—किं भाव इति। तृतीये विकल्पे भावेऽभावेऽपि भावा इत्याह—विकल्पद्वयेति। भावत्वमभावत्वमभावत्वमभावस्य दोषप्रसङ्गात् निर्विकल्पितत्वात्, भावाभावत्वमिति दर्शयति—यदि भाव इत्यादिनेति। तृतीयपक्षस्तु परस्परविरोधात् सम्भवति सम्भवे वा पक्षद्वयोक्तदोषं प्राप्नुयादित्याह—भावाभावमेवेतीति। उभयदोषप्रसङ्गं प्रकटयति—यो भावस्य इति। एवमुत्पादे दोषमभिधाय स्थितिपक्षे दोषमाह—स्थित्यामपीत्यादीति। अत्रापि भविष्यन्निष्ठित उत्पत्त्यनन्तरमेवास्तित्वादयमिति दर्शयति—किं निष्ठित इति। निष्ठितत्वे न स्थितिः न वास्तित्वात्मा नाप्युत्पत्तौ वा सर्वत्रोत्पादपक्षोक्तदोष एव इति भावः। अनिष्ठितत्वे दोष-विशेषमाह—अनिष्ठित इति। अथ विनाशपक्षेऽपि तथैव विकल्प्य दोषमाह—अन्तेऽपीत्यादीति। अविनष्टपक्षे विशेषमाह—नाविनष्ट इति। अभूतेति यस्य अभूतो भवन् च विनश्यद्भावः सोऽभूतविनश्यद्भावः तस्मादविनष्टो विनश्यतीति भावः। एवम-विनष्टत्वात्प्रसङ्गोद्भावनं प्रकृतत्वं तस्य साध्यत्वात् [illegible] निर्दिष्टं तदेव व्याख्यानमेवेत्यनुगमं विधाय प्रसङ्ग उद्भवतीत्याह नास्त्युत्पन्नत्वादि व्याख्यानतोऽपि अत एवाह—अस्यानुगममिति। निष्ठितानिष्ठितपक्षे दोषमाह—नोभयमिति। न्याये—नेति। माध्यमिककारिका अत्र भाव्या निष्पद्यमानमुत्पत्तौ भावस्य उपपद्यते। यद्यनिष्पन्नमानस्तु न भावो योऽस्ति न सिद्धिर्निष्पद्यमानस्य न भावस्योपपद्यते। तथानिष्पन्नमानस्तु न भावो भासते न निष्पन्नं नानिष्पन्नं न निष्पन्नं निष्पद्यते। तदा निष्पन्नमानं च [illegible] निष्पन्नमानं [illegible] युक्तिं उपपद्यते। उत्पन्नमुत्पद्यते न चानुत्पन्नम-

विनाशविनाशो विनश्यत्सम्भवात्, असम्भवो विरोधादुभयदोषापत्तेरिति पूर्वाचार्यानुसारेण, इत्थं नोत्पत्ति-स्थितिविनाशाः सिद्ध्यन्ति, तदसिद्धेरनुत्पन्नास्थितविनष्टत्वात् खपुष्पवदभाव एव स्यादिति ।

अथोच्येत किं न एताभ्यामसद्रूपाभ्यामाद्यन्ताभ्यां प्रयोजनम्, एतौ हि वस्तुन आत्मलाभात् पूर्वोत्तरकालौ, तयोरभावेऽपि तन्मध्ये वस्तु भवितुमर्हत्येव अत्र ब्रूमः, तन्मध्ये मध्य वा किं जातमजातं वा वस्तु स्यात्? यदि जातम्, अनुत्पादध्वंस जातस्याभिर्भाव घटवदित्यादि स एव प्रसङ्गः, यावपि च तौ कालौ तावपि न स्तः, विनष्टानुत्पन्नत्वात् तदभावे तदपेक्षत्वात्सम्बन्ध्यवस्त्वभावः, दग्धेन्धनज्वालावत्, यदि पूर्वोत्तरयोः कालयोर्नास्ति सम्बन्धे कथं सम्भाव्येत? असदप्यवस्तु, पूर्वोत्तरकालयोरसत्त्वात्, खपुष्पवदिति ।

अथोच्येत किं न इत्यादि, आरम्भ विमेताभ्यामाद्यन्ताभ्यां वस्तुनोऽसद्रूपाभ्यां विचारिताभ्यां प्रयोजनम् वस्तु विचार्यम्, एतौ आद्यन्तौ वस्तुन आत्मलाभात् पूर्वोत्तरौ कालौ—तदात्मलाभात् पूर्वः काल आविर्भावस्ते उत्तरोऽन्त्यः तयोरभावेऽपि वस्तु भवितुमर्हत्येव तन्मध्ये तस्मादत्रोत्तरमभिधत्ते अत्र ब्रूमः तन्मध्ये मध्य वेत्यादि तयोः पूर्वोत्तरकालयोर्मध्ये यद्वस्तु भवितुमर्हतीति मन्यसे, यो वा पूर्वोत्तरकालयोर्मध्यमुपभिन्नसे तदुभयमपि किं जातमजातं वा वस्तु स्यात्, यदि जातमनुत्पादध्वंस जातत्वात्, निर्वृत्तघटवदित्यादि स एव त्रिषु योग्यो दोषापादनप्रसङ्गः तुल्यदोषत्वात् किञ्चान्यत्—यावपि च तौ कालौ पूर्वोत्तरौ तावपि न स्तः तत्सम्भवादपि विनष्टानुत्पन्नत्वात्, तदभावे—तयोः कालयोरभावे तदपेक्षस्य सम्बन्धवस्त्वभावः, किमिव? दग्धेन्धनज्वालावत्, यथेन्धनापेक्षया ज्वाला इन्धनापेक्षा भवन्तीति सम्भाव्या अपि निर्दग्धे तस्मिन्निन्धने न सन्ति तदपेक्षत्वात्तदभावे तथा पूर्वोत्तरकालापेक्षं मध्यमिन्नमभिमतं वस्तु तदपेक्षत्वात्तदभावे नास्तीति भवत्येव, यदि पूर्वोत्तरयोः कालयोर्नास्ति तस्य मध्येऽस्तित्वं कथं पुनस्तत् सम्भाव्येत? न सम्भाव्यमित्यभिप्रायः असदप्य भवतीत्यादि, अत्र साधनमसत्त्वात् पूर्वोत्तरकालयोरसत्त्वात्, खपुष्पवदिति ।

पेक्षत्वम् इति । इत्थमुत्पत्तिस्थितिविनाशासिद्धावनुत्पन्नास्थितविनष्टत्वादभावत्वात् खपुष्पवदभाव एवेत्याह—इत्थमिति । आद्यन्तौ न वस्तुन आत्मलाभात् पूर्वोत्तरकालौ कथितौ वस्तुनः पूर्वोत्तरकालयोः मध्यकाले तयोरभावेऽपि वस्तु भवितुमर्हत्येवेत्याह—अथोच्येतेति । व्याख्या—आरम्भमिति आरम्भादि आद्यो विनाश अन्त्यः पूर्वमध्ये वा उत्तरे वस्तुन आत्मलाभात् पूर्वोत्तरकालयो तौ च न वस्तुन आत्मलाभे तयोरभावेऽपि मध्यकाले भवितुमर्हत्येव, तस्य वस्तुनोऽस्तित्व-मिति भावः । आद्यन्तयोर्मध्यकाले वस्तु यदाद्यन्तयोर्मध्यमास्ते यदि किं जाते अजाते उत्पन्ने वा स्थिते अस्थिते स्थित-स्थिते वा विनष्टे अविनष्टे विनश्यति वेति विकल्पनीयमर्थम् पूर्वोत्पन्नस्थानस्थितस्य तस्य सम्भव इत्यादिदोषः—तन्मध्ये मध्यं वेत्यादीति । तौ च पूर्वोत्तरकालौ तौ मध्यकाले न स्तः पूर्वकालस्य विनष्टत्वात्, उत्तरकालस्य अनुत्पन्नत्वात्, तयो-रभावे मध्यकालेऽपि न भवति तस्य पूर्वोत्तरकालापेक्षत्वेन तदभावे कथं मध्यकालो भवेत्, तदभावे च मध्यकालवर्तिनो वस्तु-नोऽभाव इत्याह—यावपि चेति । दृष्टान्तमाह—दग्धेन्धनज्वालावदिति यथाग्निज्वाला इन्धने तदपेक्षा यथा ज्वाला न भवति तद्विवक्षायां । तमेव व्याचष्टे—यथेन्धनापेक्षयेति । दार्ष्टान्तिकमाह—तथा पूर्वोत्तरेति । यदसत् पूर्वकाले उत्तरकाले च नास्ति तन्मध्यकालेऽप्यस्ति न सम्भाव्येतेत्याह—यदीति । इदमेव प्रमाणेन दर्शयति असदप्यवस्त्विति । मध्यकालवर्त्यभि-मतं वस्तु न सत् पूर्वोत्तरकालयोरसत्त्वात् यदि पूर्वोत्तरकालयोर्नास्ति तन्मध्येऽपि नास्ति यथा खपुष्पादि, तथा चेदमिति

अथोच्येत आदौ मध्ये, न चोत्पन्नमात्रे, कार्यं तस्योपनिष्ठपनात् प्रागसदेव, तदर्थं प्रवृत्तेः, न हि तदर्थित्वे सति तस्मिन्नुपपद्यते, तस्योपनिष्ठपनादुत्तरकालमस्ति, तदर्थमप्रवृत्तेः, न ह्यसति तस्मिंस्तदर्थी न प्रवर्तते, एतदसत्यम्, तदसत्त्वानिवृत्तेरसदेव स्यात् पुनरपि, तदादिमध्यान्तेष्वभूतत्वात् खपुष्पवदिति ।

अथोच्येतत्यादि, आदौ—आरम्भे, मध्ये—क्रियाकाले, न चोत्पन्नमात्रे—क्रियापरिसमाप्तौ, कार्यं—द्रव्यादि द्रव्यत्वादि-तस्योपनिष्ठपनात् प्रागसदेव, कस्मात्? आदौ मध्ये च तदर्थं प्रवृत्तेः, न हि तदर्थित्वे सति तस्मिन्नुपपद्यते, तस्योपनिष्ठपनादुत्तरकालमस्ति, कस्मात्? तदर्थमप्रवृत्तेः, उपरतक्रियत्वात्, न ह्यसति तस्मिंस्तदर्थी न प्रवर्तते, अत्र ब्रूमः—एतदसत्य तदसत्त्वानिवृत्तेरसदेव स्यात् पुनरपि, तदादिमध्यान्तेष्वभूतत्वात्, खपुष्पवदिति, एवं तावदनुत्पादादपि शून्याः सर्वभावाः ।

इतश्च नास्ति वस्तु सामग्रीदर्शनादपि, सामग्र्यां भावा दृश्यन्ते न प्रत्येकं स्वरूपेण, यच्च स्वरूपेण नास्ति तस्य सामग्र्यामपि कुतोऽस्तित्वम्? इह लोके यावती घट इति संज्ञा कपालसामग्र्यां पट इति संज्ञा तन्तुसामग्र्यां रूपमिति च संज्ञा तत्सन्तान तत्सामग्रीमात्रमेव, सामग्री च भावानां भावान्तरं प्रति व्यापारः, यथा तन्तूनां पटं प्रति व्यापारः, तत्र च सामग्र्यामेकैकोऽवयवो नावयवी सम्भवति, तच्छक्त्यभावात्, न तावद्धेतुप्रत्ययसामग्री, पृथग्भावेष्वदर्शनात्, नापि तत्स्वरूपपृथक्त्वम्, अप्रत्यक्षतः, अनुमीयतेऽपि च नास्तीति, तत्तासिध्य एव तदर्थप्रवृत्तेः, यच्च येषु नास्ति तेषु तदर्थी तदर्थं न प्रवर्तते घटपटवत्, न हि कुम्भः पटे नास्तीति मत्वा तदर्थिनां तदर्थं प्रवर्तनं पटे दृष्टम्, पटोऽपि वा कुम्भे नास्तीति मत्वा तदर्थिनां तदर्थं प्रवर्तनं कुम्भेऽपि दृष्टम् ।

(इतश्चेति) इतश्च नास्ति वस्तु सामग्रीदर्शनादपि, सामग्र्यां भावा दृश्यन्ते घटपटादयो न प्रत्येकं स्वरूपेण, यच्च स्वरूपेण नास्ति तस्य सामग्र्यामपि कुतोऽस्तित्वम्? सिकतावैकल्यतिस्थूपनयार्थो

भावः । ननु पूर्वोत्तरकालयोरुभयोरसत्त्वमभिप्रेतम्, तस्योपनिष्ठपनात् पूर्वकाले कार्यमसत्त्वात्तदुपनिष्ठपनादुत्तरकाले च तस्यासिद्ध्यपदर्शे—अथोच्येतेति । कस्मादित्यादौ भावदिति । आदिरिति क्रियारम्भकाले मध्ये—कार्यनिष्पत्तिक्रियाकाले च कार्योऽसत्, तस्योपनिष्ठपनप्रागसत् भावाभावेनैव तदानीं तदर्थिनां प्रवृत्तिसम्भवप्रतिदर्शनात् न हि तदानीं सत् विद्यमाने तदर्थिनां प्रवृत्तिसम्भवः स्यादिति कार्यमसदेव तदुपनिष्ठपनात् प्राक्काले [illegible] भावः । उत्पन्नमात्रे च कार्यक्रियापरिसमाप्तौ तु [illegible] तदानीं तदर्थिनां प्रवृत्तेरसम्भवात् न हि तदानीमसति घटे तदर्थी न प्रवर्तेत इति युज्यते [illegible], तस्मात् पूर्वोत्तरकालयोरसत्त्वम [illegible]—तस्योपनिष्ठपनादिति । अथादि वस्तुनः पूर्वे काले [illegible] मध्यकालेऽप्यन्ते [illegible] खपुष्पवत् तथापि न निवर्तते सर्वभावा अनुत्पादा- [illegible] एतदसत्यमिति । अथ [illegible] सामग्री कार्येऽपि न सर्वभावाः इत्याह—इतश्च नास्ति वस्त्विति । ननु [illegible] भावाः [illegible] दर्शनात्, किन्तु [illegible] प्रत्येकं नास्ति [illegible] इत्याह—सामग्र्यामिति । [illegible]—सिकतेति । सामग्र्यां भावा दृश्यन्ते [illegible]

भविष्यति, तद्यथा—घटोऽत्र नासीदित्यादि, घट इति संज्ञा कपालसामग्र्यां घट इति तदनुसारस्वरूपमिति तत्स्थाने—घटोत्पत्तिविनष्टरूपस्थाने, यथास्थानस्थत्वात् पतितभिन्नत्वादि मृदिति संस्थानं वा हेतुफलभिन्नावयवदर्शनमात्र सामग्रीमात्रमेवेति, का सामग्री ? उच्यते भावानां भावान्तरं प्रति व्यापार, तत्प्रदर्शनम्—यथा तन्तूनां पट प्रति व्यापारः, अवयविनोऽवयवत्वेन व्याप्तिनियमाभ्यां अवयवा एव तथावस्थिताः सामग्रीत्युच्यन्ते, अवयवसमैकत्वे तदभावात्, तत्र चैतदपि, इत्थम्भूतायाश्च सामग्र्या व्यपृथग्भावं तन्त्वाद्यवयवानामेकैकोऽवयवो नावयवी सम्भवति, तत्पृथक्त्वाभावात् प्रत्येकमसत्त्वे तत्समुदितावयवसत्त्वमिलितावयविनः सर्वथाऽप्यभाव एव स्यात्, तद्यथाऽऽह—न तावदित्यादि, हेतुफलसामग्री पृथगप्यनुपदर्शनात्—नास्ति हेतुषु—तन्तुषु पटो नास्ति, प्रत्यये—निमित्तकारणेषु तुरीवेमशलाकादिषु नास्ति तस्मादपि सामग्री तदन्तर्लीनत्वं, नापि तत्स्वरूपपृथक्त्वम् अप्रत्यक्षत्व इति, प्रत्यक्षेणैव हि प्रमाणेन तन्तुस्वरूपे तुर्यादिस्वरूपे वा पृथगनुपलभ्या सामग्री पटाख्या, अनुमीयतेऽपि च नासीति तत्साधिम्य च [त] तदर्थमनुपो-सन्निहितेष्वेव हेतुफलेषु तन्तुतुर्यादिषु पटार्थी पटो नासीति मत्वा तदर्थं प्रवर्तते, ततो नास्ति किञ्चित्।

घट घोऽत्र इति घट नास्ति येऽत्री घट इति वा घट इति वा स्थासिति वा कुशूलिति वा पृथुबुध्नेति वा प्रत्येका दृश्यन्ते ते लोके कपालसामग्र्यामेव भवन्ति न ततो व्यतिरिक्ता ... घट इति ... घट इति नामधेय तदनुसाराणां घट इति ... स्थासिति ... कुशूलिति ... पृथुबुध्नेति निमित्तभेदात् ... एव ... इति भावः। सामग्रीपदार्थमेव ... का सामग्रीति, भावान्तर पटादिक प्रति भावस्य तन्त्वादेर्विशिष्टावस्थारूपेण योऽयं व्यापारो—व्याप्तिनियमाभ्यां सैव सामग्रीत्वं। ... कथेति। एवं सामग्रीमात्रदर्शनप्राप्तावयवमात्रे प्रतिपादितेऽपि न ... सामग्रीस्वरूपं ... प्रतिपादयितुं सामग्रीस्वरूपं व्याचष्टे—अवयविन इति अवयविनोऽभिमतस्य पटादेरवयवा एव तन्त्वादयो विशिष्टरूपेण व्यवस्थिता सामग्रीत्युच्यन्त इति भावः। विशिष्टसंस्थानेन ... सामग्रीत्वात् ... नैव च प्रत्येकमवयवेषु अवयवसमुदायानां ... सामग्र्या ... स्यात्, न ततो व्यतिरिक्तोऽपि ... इत्थम्भूतायाश्चेति विशिष्टसंस्थानसमवस्थितानां ... तत्त्वमेवेति ... एकैकोऽवयवोऽवयवी ... हेतुफल—तत्पृथक्त्वाभावादिति ... प्रत्येकमिति। ... न तावदित्या-दीति हेतुफलेषु पृथगपि न तावत् सामग्रीति प्रदर्शनादित्यर्थः। व्याचष्टे—नास्ति हेतुष्विति ... कारणेषु सामग्री ... नास्ति प्रत्ययेषु—निमित्तकारणेषु तुरीवेमादिष्वपि नास्ति सामग्रीति भाव। हेतुफल-सामग्रीति ... सामग्र्या नासीत्यत्र नापीति हेतुफलसामग्र्या ... । ... हेतुफल-अप्रत्यक्षत्व इति ... । व्याचष्टे—प्रत्यक्षेणैव हीति। अनुमानादपि सामग्र्यभावमाह—अनुमीयतेऽपि चेति हेतुफलेषु नास्ति सामग्री तत्साधिम्य एव तदर्थमतो ... प्रयोगः। हेतुमाह—तत्साधिम्य इति, हेतुफलसन्निधान ... । हेतुं व्याचष्टे—सन्निहितेष्वेवेति। हेतुफलेषु यदि सामग्री स्यात् तर्हि तत्सन्निधाने सति पटार्थी तदर्थं न प्रवर्तेत, प्रवर्तते तु, तस्माद्धेतुषु पटो नासीति भावः। एव मेषु कारणसमवायिषु नास्ति तेषु तदर्थी तदर्थं न प्रवर्तते यथा घटे कारणसमवायिनि पटस्याभावात्, न हि पटार्थी पटाय घटे प्रवर्तेत इति प्रयम्, घटे वा कारणसमवायिनि ... पटार्थं घटे प्रवर्तेत इति ... वैधर्म्यं प्रदर्शयति—यथा

1 सि. क्ष. डे. व्याख्याता।

घटपटवत्—यथा घटे सन्निहितेऽपि पटार्थी पटो नास्तीति मत्वा तदर्थं [न हि] प्रवर्तते, पटे वा सन्निहिते पटार्थी घटार्थम्, एवं येषु नास्तीत्युपनयो गवार्थो यावत् कुम्भेऽपि दृष्टम्, नास्तीति वर्तते।

अत्राह—

ननु कुम्भस्य सिकताकणेषु प्रत्येकमदृष्टस्य दर्शनादिति, न सामग्रीतुल्यत्वात्, सामग्री हि साध्या तथैव तुल्यः कुम्भोऽपि, अस्माभिरपि दृष्टः स्यादित्येतत्साध्यते—अस्ति नास्ति वा सामग्रीति, तस्यैवोपन्यासात्तद्विपक्षाभिमत्याऽनैकान्तिकत्वचोदनं पाठमात्रमेतद् प्रत्येकमदृष्टस्य सिकतासु कुम्भस्य दर्शनमिति।

(नन्विति) ननु सिकताकणेषु प्रत्येकमदृष्टः कुम्भः सामग्र्यां दृष्ट इत्यनैकान्तिकदोषोद्भावन परः स्यात्—कुम्भस्य सिकताकणेषु प्रत्येकमदृष्टस्य दर्शनादिति [च] ब्रूमः—न, सामग्रीतुल्यत्वात्—नानैकान्तिकः प्रत्येकमसत्त्वात् समुदायेऽप्यसत्त्वमिति यस्मात् सामग्री साध्या तथैव तुल्यः कुम्भोऽपि विपक्षत्वाभिमतः साध्यत्वात् एव एव तस्यापि कुम्भपरिणामस्य समुदायत्वात्, तस्माद्विपक्षासिद्धेरनैकान्तिकत्वोद्भावनमसत् चास्मदुत्तरमिदम्, तद्व्याख्या—अस्माभिरपि दृष्टः सामग्र्युपलम्भेन सामग्र्या अभ्युपगम इति, तदेव स्यादपि प्रत्युत—न त्वेतत्साध्यते अस्ति नास्ति [वा] सामग्रीति, तस्यैवोपन्यासात्तद्विपक्षाभिमत्याऽनैकान्ति[क]त्वचोदन पाठमात्रमेतत् प्रत्येकमदृष्टस्य सिकतासु कुम्भस्य दर्शनमिति, एवं तावत् सामग्री नास्तीति प्रतिपादितम्।

अवयवास्तर्हि सन्तीति चेन्न, मा रूपादिभ्योऽवयविनश्चासत्त्वस्योक्तत्वात्, रूपादयोऽपि न स्वतो रूपादित्वं लभन्ते यस्मात् रूपादयस्तु रूपणादिनिरूपितविज्ञानसाराः तत्र रूपादीनां परस्परतः पृथक्त्वं हेतुत्वञ्च युक्तौ पृथगेव नापृथक्, तस्माच्च बहिरस्तित्वं जनयितुमर्हतस्ते हेत्वाद्यभावे सामग्र्यभावात्, सामग्र्यभावे च का द्रव्यता? इतरेतरदोषापत्तेरिति।

(अवयवा इति) अवयवास्तर्हि सन्तीति चेत्—साम्प्रत पटस्य सम्बन्धोऽवयवाः सन्तीति, तन्न,

यच्चेति। ननु नास्ति सामग्री प्रत्येकमसत्त्वात्, सिकतानेकान्तिकेति यदुक्तं तत्र हेतोरनैकान्तिकत्वमुद्भावयति–ननु कुम्भस्येति। भाष्यते–नन्विति। सिकताकणेषु हि कुम्भो दृष्टः प्रत्येकं सिकताकणेष्वसत्त्वपीति प्रत्येकमसत्त्वहेतोरनैकान्तिकत्वमिति भावः। कुम्भः सामग्र्यामसत्त्वेऽसिद्धेऽसिद्धं सामग्रीतुल्यत्वात् कुम्भस्य सामग्रीमात्रसाधनत्वं हि यदा निरूप्यते तदा सामग्रीविशेषस्य कुम्भस्य सत्त्वं मन्वानेनानैकान्तिकत्वमुद्भाव्यते तदानैकान्तिकत्वोद्भावनमाभास एव साध्यसमत्वात्तदुत्तरमिति समाधत्ते–सामग्रीतुल्यत्वादिति। नानैकान्तिक इति समुदायेऽप्यसत्, प्रत्येकमसत्त्वादिति साध्ये नानैकान्तिकमित्यर्थः। सामग्रीतुल्यतां स्फुटयति–यस्मादिति। समुदाये सत्त्वमिष्टम्, सामग्रीविशेषः कुम्भस्तत्र विपक्षत्वेन सामग्रीमात्रपक्षान्तर्गतत्वात्, एवं एवेति नास्ति विपक्षासिद्धिरिति अनैकान्तिकत्वचोदनाऽऽभासत्वादस्मदुत्तरमिदमिति भावः। विपक्षासिद्धिमेव स्फुटयति–अस्माभिरिति कुम्भोऽस्माभिरपि समुदायनिष्पन्नं सत्त्वं यदि दृष्टं भवेत् तर्हि समुदाये सामग्री सत्त्वं न वा वर्तत इति सत्त्वासत्त्वसाधनप्रयास एव किमर्थं तस्मात्पक्षान्तरं विपक्षमिति तदर्थं पक्षाभ्यां विपक्षतया तदोद्भाव्य प्रत्येकमसत्त्वेऽपि सिकतासमुदाये कुम्भस्य दर्शनमिति तद्‌चोदकं पाठमात्रमेव नानैकान्तिकत्वमत्र घटतीति भावः। निगमयति–एवं तावदिति। ननु मास्तु सामग्री तदवयवास्तु सन्तीति एव सर्वभावसत्ता कल्पनीयेत्याशङ्कते–अवयवास्तर्हीति। व्याख्याति–साम्प्रतमिति सामग्र्यामसत्त्व प्रत्याख्यातेऽपि तदवयवानामस्तित्वे विवाद एवेति न सामग्रीमात्रप्रत्याख्यानं भावः।

1 सि. क्ष. भा. ट. कुम्भवत्।

कस्मात् ? मा रूपादिभ्योऽवयविनश्चासत्त्वप्रसङ्गात्–यथा रूपादयोऽणुषु, अंशकबुद्धिषु बुद्धयः पश्यन्ति यस्मादि स्वावयवेषु न सन्तीत्यादि यावत् परमाणुशो विभागस्यावयवयभ्येव परमाणुविभागस्यातिरेकस्य सत्तिति चेत्, सोऽपि रूपरसगन्धस्पर्शभेदेनावयवस्येव, एवं तर्हि रूपादयोऽवयवा एव नावयविन इति चेत् तेऽपि न सन्तो रूपादिरर्थ्यन्ते, यस्मात्प्रत्यक्षस्तु रूपमिदमितिरूपविज्ञानस्याराः–रूपमेव इति रूप रसस्य इति रस इत्यादिविज्ञानेनैव निरूप्यन्ते रूपादयः तत्स्वरूपविज्ञानेन प्रकल्प्यन्ते, तत्र रूपादीनां परस्परतः पृथक्त्वं हेतुत्वञ्च बुद्धौ इतो संघटते, न तस्मात्तत्त्वतः स्वात्मनेव, तस्माद्बुद्धिरेवात्र [न]ञनतिद्धुरर्थेता वे हेतुरुपपद्यते, बुद्धिव्यतिरेकेण स्वरूपाभावात्, तदुपसंहरन्नाह–हेत्वाद्यभावे सामग्र्यभावात्–हेतुप्रत्ययस्वरूपपृथक्त्वानामभावे रूपादीनां क्व सामग्री ? सामग्र्यभावे क्व द्रव्यमेति ? द्रव्याभावे सर्वाभावप्रसिद्धिः, तस्माद्बुद्ध्युपकल्पितमवयवी सामग्री विद्यते अवयवा एव वा सन्तीति सिद्धान्तात्–इतरेतराश्रयदोषाच्च–अवयविसद्भावेऽवयवावयवत्वात् सिद्ध्यन्ति हेतुत्वाच्च तेषु चाऽवयवेषु सत्सु तदवयविसिद्धात् कार्यत्वादवयवी-सिद्धतीति तदिदमितरेतराश्रयत्वम् इतरेतराश्रयाणि च न प्रकल्पन्ते यथा–नौर्नौरिव बद्धा नेतरत्राणयति, एवं सामग्रीदर्शनादपि न सन्ति सर्वभावाः ।

इतश्च न सन्ति तथाऽदर्शनात्, सर्वथाऽप्ययुक्तयो दर्शनाद्यगृहीतस्वभावाः सन्तोऽर्थाः कल्पयितव्याः, तथापि न सन्ति तस्य दर्शनस्यासम्भवात्–तदपि च दर्शनं नास्त्येव यतो यावद् दृश्यं तावदारान्मध्यपरभागम् तत्र यथारम्भागो दृश्यते इति प्रत्यक्षमिष्यते परमध्यभागयोरदर्शनादप्रत्यक्षता तस्य किं नेष्यते ? तस्मादवदर्शनमेव वस्तुनः ।

(इतश्चेति) इतश्च न सन्ति तथाऽदर्शनात्–अदर्शनादपि तेनैव प्रकारेण न सन्ति, तत्र परमताऽऽशङ्का-

यन्तोऽपि तावत्तं यदि तदवयवोऽपि तावत्तं प्रतीतेऽर्थ भावपरमाणुत्वं सामग्रीतैव प्रोच्यतेऽस्य तथा तत्त्वादिसामग्र्यभावभविष्यतीति तत्प्रस्तावे–मा रूपादिभ्य इति अत्र मर्यादायां न तत्सिद्धौ रूपादेरवयवत्वमिति तदवयविरेकत्वात् तदैव प्रत्यक्षविशेषावयवः सिद्ध एवेति भावः । तदत्र तावत् भाष्ये–तथापेति । ननु रूपादीनां तावदवयवानां सिद्धेऽपि निरव-यवाः परमाणवः कल्पयन्त इत्याह्वेते–परमाणुरिति । परमाणोर्निरवयवत्वमिदम् रूपरसगन्धस्पर्शरूपपुरुषस्य स्वरूपापेक्षया-सोऽपीति परमाणुरपीत्यर्थः । एवं तर्हि रूपादीनामवयवत्वमिति साधितमाहुर्वे–एवं तर्हीति । रूपादिनामपि न सत्त्वेऽ-स्तित्वम् किन्तु विज्ञानेन रूपमात्रकल्पने रसनादिकतः प्रत्यक्षत्वात्प्रत्यक्षं तत्स्मात्तस्य सर्वं सिद्धं । रूपादयो विज्ञानेनैव निरूप्यन्तऽतो विज्ञानमात्राः रूपादिविज्ञानस्वरूपप्रत्यक्षत्वादिति व्याख्यातं–तेऽपीति रूपादयोऽपि न सन्तो रूपादिरर्थं कल्प्यन्ते किन्तु विज्ञानेनेति भावः । रूपमिति बुद्धौ रस इति बुद्धौ गन्ध इति बुद्धौ स्पर्शं इति बुद्धौ च प्रतिनियतस्वभावतया तदर्थैः यदि तेषां हेतुत्वम् भिन्नबुद्धिविभक्तत्वेन च तथा परस्परं भेदः तस्मादेव बुद्ध्यधीनस्वरूपत्वे बुद्धितत्त्व न तु बुद्ध्यन्तरस्य कार्यं तथा हेतुत्वं कार्यस्य सम्भवतीत्याह–यस्मात्तदुपपद्यत इति । तस्मादिति यस्माद्रूपादीनां हेतुत्वस्वरूपपृथक्त्वे विज्ञानात्मके तस्माद्वे रूपादीनां बुद्धिविषयत्वादिभिरस्यत्वम् बहिर्वर्तित्वं न सम्भवत इति भावः । रूपादीनां स्वरूपं बुद्धिरेव न ततो व्यतिरिक्तं तत्स्वरूपमित्याह–बुद्धिव्यतिरेकेणेति । एवं रूपादीनां हेतुत्वस्य स्वरूपस्य चाभावात् सामग्र्यपि नास्ति अतः द्रव्यतया सिद्धेऽपि नास्ति अवयवत्वमपि अवयव एव हेत्वाद्यभाव इति । भाष्ये–हेतुप्रत्ययेति । अवयविसिद्धौ तदवयवत्वस्यावयवत्वसिद्धिः स्यात्, अवयवसिद्धौ च तदवयविनस्तदवयविसिद्धिः अतोऽन्योन्याश्रयत्वमिति तदाह–इतरेतरेति । भाष्ये–भवत्यवीति । सामग्रीदर्शनमुपसंहरति–एवमिति । दर्शनमपि नास्ति तदाह–इतश्चेति । यत्र प्रत्यक्षमपि तं परमाणुं प्रत्यक्षत्वेन तदवयवभागद्वयमपि न दृश्यत इति भाव्यते । अदर्शना-

सर्वथाप्यनुपलम्भ इत्यादि—न सन्ति पुरुषो येषामर्थानामुपलम्भस्ते, यद्यपि पुरुषैर्नोपलभ्यन्ते प्रत्यक्षत उपलभ्यन्ते दृश्यन्ते दृश्यमानाश्च निराकर्तुं न शक्यन्ते, अतो दर्शनायोगृहीतसद्भावाः सन्तोऽर्थाः कल्पयितव्या इति, यदि कल्पयेरन् तथापि न सन्ति, तस्य दर्शनस्यासम्भवात्, तदाह—तदपि च दर्शनं नास्त्येव, कथं दर्शनं नास्ति? उच्यते—यतो यावदित्यादि—यावद् दृश्य तावत्, [आरम्भस्य] परभागम्, दृश्याभिमतस्य हि वस्तुन आराद्भाग एव दृश्यते न परमध्यभागौ दृश्येते, तेनावश्यमारान्मध्यपरभागैर्भवितव्यं वस्तुनः, तत्र यद्याराद्भागो दृश्यत इति मतमिष्यते परमध्यभागयोरदर्शनादप्रत्यक्षता तस्य किं नेष्यते? तस्माद् अदर्शनमेव वस्तुनः, न हि आराद्भागमेव वस्त्विति।

अथ मतमाराद्भागो नियमात् प्रत्यक्षतो गृह्यते परमध्यभागावप्यनुमानात् कालान्तरे च प्रत्यक्षतो गृह्येते इति, न तथापि त्रिभागत्वतुल्यत्वाददर्शनमेव सावयवत्वात् समस्तावयवस्यादर्शनवत् अथ मतं भागो दृश्यत इति परमाणवस्तर्हि गृह्यताम्, तेष्वदृश्यमानेषु निर्भागेषु भागवद् दृश्यत इति का कथा? भागान्तरादृश्यत्वात्, सिकतातैलवत् प्रत्येकं दर्शनाभावे तत्समुदायेऽपि दर्शनाभावात्, यदा च परमाणुर्न कस्यचिद् दृश्यस्तदा कुतः परमाणुसंघातो भागवान् दृश्यते? भागस्यति वा परमध्याग्रहणादगृह्यमाणे सर्वथा निर्विभागाः परमाणवो गृह्यन्ते? इति।

अथ मतमित्यादि, स्यादिदं ते मतिराराद्भागस्तावद्गृह्यते नियमात् प्रत्यक्षतः तथा मध्यपरभागावप्यनुमानात् कालान्तरे प्रत्यक्षतो गृह्येते, तस्मान्नादर्शनमेवेति, अत्र ब्रूमः—न तत्रापि त्रिभागत्वतुल्यत्वात्—आराद्भागेऽपि दृश्याभिमते त्रयो भागाः सम्भवन्त्येव आरान्मध्यपरभागरूपाः सावयवत्वात्, विभज्यमानं हि सावयवं त्रिधा व्यवतिष्ठते तदवस्थात्रापि परमध्यभागादर्शनम् त्रिभागतुल्यत्वात् समस्तावयवादर्शनवदिति, एवं तावत् सावयवस्य त्रिभागस्य दर्शनासम्भवः, अथ मतं भागो दृश्यत इति—यभिर्विभा-

दर्शीति। यद्यपि भावा पुरुषैर्न विज्ञायन्ते प्रत्यक्षतस्तथाप्युपलभ्यन्ते उपलभ्यमानाश्च प्रतिषेद्धुं न शक्याः तस्मात् सत्त्वेन निश्चेतव्याश्च भावा अनुपेक्ष्या एवेति कथं सत्त्वव्यवस्थापनमेव—तत्र परमताऽऽशङ्केति। एवं सत्यपि [illegible] परन्तु भावानां दर्शनमेव तावत् [illegible]—यदि कल्पयेदपीति। कथं दर्शनं न [illegible]—तदपि चेति। यद्दृश्यत्वेना-भिमतं तद् यावत्, आरान्मध्यपरभागम्, तत्र दृश्यत्वेनाभिमतं वस्तु [illegible] न पूर्वं गृह्यते [illegible] एव तस्य गृह्यते न तु मध्यपरभागौ [illegible], न आराद्भागमात्रमेव वस्तु [illegible] इति वस्तु न दृश्य-मित्य [illegible]—यावद् दृश्यमिति। [illegible] वस्तुन आह—तेनेति। तत्राराद्भागमात्रदर्शनेनैव यदि वस्तुनः प्रत्यक्षमिष्यते तर्हि [illegible] कुतो नेष्यते? [illegible] आराद्भागमात्रदर्शनस्य [illegible] पुरुषेत्याह—यत्र यदीति। [illegible] मध्यपरभागयोरनुमानात् कालान्तरे च प्रत्यक्ष इति वस्तुनो दृश्यं भावदर्शनमिति शङ्कते—अथ मतमिति। व्याचष्टे—स्यादिदमिति आराद्भागस्येत्य-[illegible] गृह्यमानं च [illegible] मध्यपरभागौ तु [illegible] कालान्तरे च प्रत्यक्षौ गृह्येते इति वस्तु-[illegible] भावः। [illegible] आराद्भागस्यापि [illegible] एव गृह्यते आराद्भागस्य [illegible]—न तथापीति [illegible]। व्याचष्टे आराद्भागेऽपीति [illegible] त्रिविभागाः तेषु [illegible] आराद्भाग एव दृश्यते न मध्यपरभागौ [illegible] भावः। एवं [illegible] निर्विभागत्वं [illegible] अथ मतमिति। व्याचष्टे—यदीति। न हि

गमात्रं भागः तन्मात्रं सूक्ष्म इति चेन्मन्यसे तदपि तेऽनिष्टमिव–परमाण्वर्वाङ् सूक्ष्मताम्, न हि परमाण्वोऽतीन्द्रियाः सन्तः कस्यचिद् दृश्या इतीष्टाः, तेष्वदृश्यमानेषु निर्भागेषु भागवद् दृश्यत इति का कथा ! भागस्यादृश्यत्वात्, सिकतातैलवत् प्रत्येक दर्शनाभावे तत्समुदायेऽपि दर्शनाभावात्, भागवति च परमाणुसंघाते परमप्यभागमदृश्यमसूक्ष्ममापे तदसौ निर्भागपरमाणुर्दृश्यत इति का कथा इत्यदर्शनमात्रत्वि दर्शनम् असामर्थ्यदर्शनस्य व्याख्या–यदा च परमाणुरित्यादि यदीष्यन्त इति गतार्थम्, कुत इत्यनुवर्तमानम् ।

रूपदर्शनव्यवहारस्तर्हि कथमसति रूपे सम्भवतीति चेदुच्यते, ननु व्यवहारो विज्ञानोत्थापित एव, विज्ञानमात्रत्वमपि बाह्येऽर्थे तथा तथा विपरिवर्तमानं बाह्यार्थवदवभासते, वस्तुत्वात् स्वप्नवत्, तथापि आप्रतीतोऽर्थः कारणमिति चेत्तत्र च तत्र च विज्ञानमेव कारणम् स्वप्नजागरणकारणेन विज्ञानेनैवोत्थापितोऽर्थोऽयं इति प्रतिपत्तुं शक्यो नान्यथा, यदि बाह्यविज्ञानोऽर्थः कश्चिदस्ति स दर्शयितव्यः त्वया मया पुनः शक्यतेऽर्थेन बाह्येन विज्ञानमेवार्थ इति दर्शयितुम्, तद्यथा–स्वप्ने स्वनर्थक विज्ञानमेवार्थ इति ।

(रूपेति) रूपदर्शनव्यवहारस्तर्हि कथमसति रूपे सम्भवतीति चेदुच्यते ननु व्यवहारो विज्ञानोत्थापित एव विज्ञानमा[त्र]त्वमपि बाह्येऽर्थे तेन तेनाकारेण विपरिवर्तमानम[र्था]न्तरे च बाह्यार्थवद[व]भासते वस्तुत्वात्–विज्ञानत्वात्, किमिव ? स्वप्नवत्–स्वप्न इव स्वप्नवत्, यथा सुप्तः 'संवृतेऽवकाशेऽप्यसम्प्रवितं हस्तियूथपर्वताद्याकारं पश्यत्यसन्तमेव हस्तियूथादिबाह्येऽर्थे तथाप्यन्तर्विज्ञानपरिणामादेवं ग्रामदेशनगरादिविज्ञानान्यन्तर्वर्तिबहिरर्थाभासानि, न कश्चिदपि ततिरिक्तोऽर्थ इति, यथोक्तं 'यो ह्यया

विभिन्नाभो यथा परमाणुरुच्यते यदि निर्विभागत्वस्य प्रकाशतेऽप्यते तदा परमाणोर्निरवयवत्वाः स च नेष्ट इत्यपरमाणव इति । एवं परमाणोरतीन्द्रियत्वेनाग्रहणत्वात् तत्समुदायस्य नाप्यर्थः प्रत्यक्षता न स्यादेव, एतस्यार्थस्य ततस्य त्वमुदायस्यादर्शनादिस्य–नहीति । भागस्य त्वेत्याह–भागस्यत्वेति तत्प्रतिभागपरमाणुरदृश्यत्वे च परमाणोरपि परमाणुत्वेनादृश्यत्वात् । निदर्शनमाह–सिकतेति प्रत्येकं सिकतासु तैलदर्शने सिकतासमुदायेऽपि तद्दर्शनं न भवति, भागवतो परमाणुसमुदायस्य दर्शनमस्ति भाव । भागवति चेति भागिनः परमाणुसमुदायस्य भागदर्शने तदा तदवयवा परमाणुसमुदाये किन्तु स्यात् भागिनो दर्शने भागपरमाणुसमुदायत्वादिति भाव । भागानामदृश्ये भागिनोऽदर्शनम्, भागिनोऽदर्शने कुतः भागस्यापि दर्शनमिष्यते भागत्वेनाह–असामर्थ्यदर्शनस्येति । एवं सर्वमाह दर्श वस्तु भावस्तुत्वम्, एवं रूपस्याभावे दर्शनस्यापि रूपदर्शनव्यवहाराभावात् रूपदर्शनव्यवहारे लोके परिदृश्यमाने कथं ताविच्चाशङ्कते–रूपदर्शनेति । भावते रूपेति । लोकव्यवहारे विज्ञानमात्रोत्थापिते न बाह्यवस्तुभिरन्यत्र एतदुत्तरमाह–भवत्विति, अन्तर्विज्ञानोत्थापितः सर्वो व्यवहारः अन्तर्विज्ञानमेवार्थ सर्वो बाह्यार्थनिरपेक्षो बाह्यवस्तुभाववत् प्रतिभासमानमन्तर्बहिरर्थेभ्योऽपि विज्ञानमेवेति इत्यत्रस्य प्रतिभासान्तरं स्वप्ने यथा विज्ञानमर्थाभासमपि स्वप्नविज्ञानमुत्पन्नं बहिरर्थाभावात् च विज्ञानमन्तरिव वस्तुत्वात्सैव वस्तुत्वमिति भाव । तत्र दृष्टान्तमाह–स्वप्नवदिति । दृष्टान्तं प्रकाशयति–यथा सुप्त इति अन्तर्विज्ञानपरिणामात्स्वप्न सुप्तस्य दृश्यमाने हस्त्यादिरूपाणि हस्तियूथपर्वतादीने बाह्यवस्तुसमानरूपोऽपि यद्यपि तथैव ग्रामनगरादयोऽपि दृश्यविज्ञानानि अन्तर्बहिरर्थाभासान्येव, न ततोऽतिरिक्तो बाह्योऽर्थः कश्चिदस्तीति भाव । सर्वेषामन्तर्विज्ञानस्य धर्मो बाह्यार्थनिरपेक्षत्वमवगम्यमानस्य बाह्यार्थवं वचनमाह यो ह्ययेति एते सर्वेऽन्तःकरणस्य भावा प्रतिबिम्बाः बहिरवभासिता अन्तरवभासितस्यैव बहिरवभास-

1 लि. इ. ब. द. तदुप । 2 लि. ब. डा रे. व्यवस्थापय ।

यावुद्रकाशं सागरः सरितो दिशः। अन्धाकारस्तस्यस्य मार्गं बहिरिव स्थिताः' ॥ (वाक्य० कां० १ श्लो० ४१) इति, तत्रापि बाह्यगृहीतोऽर्थः कारणमिति चेत् स्वप्ने हि दृष्टश्रुतानुभूतपरिकल्पितसुखदुःखादिरूपरसाद्याकारेणैव विज्ञानमुत्पद्यते नासत्त्वानुपलब्धरूपाद्याकारम्, तस्माद् बाह्यार्थमेव कारणमिति चेन्मन्यसे, अत्र वयं ब्रूमः, तत्र च तत्र च विज्ञानमेव कारणम्, स्वप्नजागरणकारणेन विज्ञानेनैवोत्थापितोऽर्थोऽर्थ इति शक्यते प्रतिपत्तुम्, नान्यथा, विज्ञानेनाविनाभावित्वस्यार्थस्य जागरणेऽपि स्वरूपाभावादनुपलम्भे कुतः पुनः सत्यकारणत्वम्? तत आह—यदि वाऽविज्ञानोऽर्थः कश्चिदस्ति स दर्श्यतां त्वया—ज्ञानेन[।] प्रकल्पितो न शक्यो दर्शयितुमर्थ इत्यभिप्रायः, मया पुनः शक्यतेऽर्थेन याथेन [विना] विज्ञानमेवार्थ इति, तद्यथा स्वप्ने त्वनर्थकं विज्ञानमेवार्थं इति दर्श्यते, तस्मात् स्वप्नजागरावस्थयोरप्यव्यभिचारिविज्ञानमेवार्थ इति न्याय्या कल्पना ।

अत्र नये कः शब्दार्थः ? ब्रूम –

अत्र च विज्ञानं शब्दार्थः, विज्ञानमेव हि शब्दो विज्ञानोत्थापितो रूपरसादिघटपटादिबाह्यो वाच्यो विज्ञानमेव, एवं तर्हि प्रमाणप्रमाणाभासाविशेष इति चेदिष्यत एतत्, तच्च विज्ञानं कल्पना, अनियतदेशकालाकारनिमित्तनैमित्तिकत्वात् सुप्तसंनिरुद्धादिविज्ञानवत्, पुरुषस्तु संहृतिर्वाक्यार्थः ।

(अत्र चेति) अत्र च विज्ञानं शब्दार्थः, विज्ञानमेव हि शब्दो वाचकाभिमतो विज्ञानोत्थापितः तदुपलभ्योऽपि रूपरसादिघटपटादिबाह्यो वाच्यो विज्ञानमेव यथोक्तं 'विज्ञप्तिमात्रमेवेदं भो जिन

याऽन्य इति भावः। ननु स्वप्ने रसादीनां तदाकारकाः ज्ञानस्य जाग्रदवस्थायां योऽर्थो गृहीतो भवेत्तदन्यथा तस्य बाह्यविज्ञानमात्रकोऽस्तु कारणम्, अन्यथाऽननुभूतानां कर्मकरादीनामनन्तानामुपलब्धतां च द्वितीयानन्तमानपात्रानामपि कुतो नावभासः स्यात् स्वप्नदशायामपीति, तदीयविज्ञानावभासोऽपीत्यर्थः। व्याचष्टे—स्वप्ने हीति, जाग्रदवस्थायां दृष्टाः श्रुता अनुभूता परिकल्पिता वा ये सुखदुःखादयस्तदाकारेणैव विज्ञानं स्वप्न उदयतीति भावः। अत्र जाग्रति वा स्वप्ने कारणेनैव विज्ञानेनोत्थापितोऽर्थ एव प्रतिभासते न तु स्वप्ने ज्ञाने जागरणविज्ञानमिव कारणमित्याह—तत्र च तत्र चेति, स्वप्ने च जागरणे चेत्यर्थः। ननु जागरणेऽपि विज्ञानेनार्थस्याविनाभावाभावेऽपि तद्व्यतिरिक्तत्वस्यार्थस्यार्थसाहश्यमस्तु कारणत्वं तस्य कुत इत्यत्र आह—विज्ञानेनेति। विज्ञानव्यतिरिक्तस्यार्थस्यानुपलब्धत्वा त्वया तस्यासत्त्वं प्रदर्शितं विज्ञानव्यतिरेकेण हेतुना। यदा तु त्वन्मते हेतुरेवेति किन्तु विज्ञानमेव निरूप्योऽर्थः, तदा सोऽर्थो विज्ञानव्यतिरिक्तः कथं भवेत्, यथा तु विपरीतभूतार्थव्यतिरेकस्यापि विज्ञानमेवार्थ इति निरूपयितुं शक्यते तस्माद्विज्ञानमेव सर्वत्रास्त्वर्थः, अर्थस्तु विज्ञानपरतन्त्रत्वाद्विज्ञानमेव नातिरिक्त इत्याशयेनाह—यदि वाऽस्ति नास्ति विज्ञानं यस्य एवंभूतोऽर्थः। अविज्ञानोऽर्थः। इत्थं निरूपयितुं शक्यत इत्येतदाह—स्वप्न इत्यादि। उपसंहरति—तस्मादिति विज्ञानमात्रवस्तुवादिमते विज्ञानमेव शब्दार्थो नान्य इत्यभिप्रायेण पृच्छति—अत्र चेति विज्ञानमात्रवस्तुवादिपक्षस्य इत्यर्थः। वाचकः शब्दो विज्ञानरूप एव वाच्योऽपि विज्ञानमेव रूपरसादीनां घटपटादीनां च बाह्यवस्तूनां विज्ञानस्यैव परिणामित्वात् विज्ञानव्यतिरिक्तस्याभावादित्याह—विज्ञानमेव हीति। विज्ञानमात्रमेवेदं सर्वमित्यत्र युक्तवचनं विंशतिकाया प्रमाणयति विज्ञप्तिमात्रमेवेदमिति। यदुक्तमेवेति विज्ञानं विज्ञानस्वरूपस्य नास्ति भावान्तरं विज्ञानमात्रे विषयाकारोऽर्थो नान्य तस्माद्विज्ञाने बाह्यविषयो विषयस्य स्थापितो भवत न एव बहिर्विषयान्तरं अर्थं विज्ञप्ति यथा बहिर्देव तथाऽवभासत अर्थ विज्ञानस्वरूपस्य तथात विज्ञानस्यैवाविद्यावशात्, इदं हि विज्ञानमर्थविषयत्वं भवति, अन्तर्भिन्नमेव बाह्यम् इति पर्यक-

---

१ शि भ प. दे. कथं अध्यवसायमेव वि ।

पुत्र ! यदिदं त्रैधातुकम्' (बुद्धवचनम्) इत्यादि, 'यदन्तर्ज्ञेयरूपं [तु] बहिर्वदवभासते । सोऽर्थो विज्ञानरूपत्वात् तत्प्रत्ययतयाऽपि च' (आलम्बन ६) इत्यादि, एव तर्हि प्रमाणप्रमाणाभासाविशेष इति चेदिष्यत एव, यस्मादुक्तं विज्ञान कल्पना—कल्पनामात्रमेव, अनियतदेशकालाकारमिमित्तनैमित्तिकत्वात्, प्रमाणाभिमतविज्ञानस्यापि मृगतृष्णिकादिविज्ञानवदप्रामाण्यात् एष पदार्थः, वाक्यार्थस्तर्हि कः ? इत्यत्र—पुरुषानुसंहृतिः वाक्यार्थः—विज्ञानस्यैव पौर्वापर्याभासविज्ञानानुसंहारेण सम्यग्विज्ञानं वाक्यार्थमिति ।

अथवा विकल्प एवम्भूतैकदेशः, तस्य च पर्यायास्तिकमेदत्वात्, परि समन्तादवगमः नैःस्वाभाव्यात् परिशेषोऽवगमः, सोऽस्यास्तीति मतिरस्य पर्यायास्तिकोऽयं नयः, स च भाव-भावोऽपि भाव एव साकारोऽनाकारो वा प्रमाणप्रमाणाभासाविविक्तसशून्यः, ग्रन्थग्रन्थैव पदेष्वपि मुर्गेति, तस्या विचारे यस्मत्यये ग्रन्थमिति, ग्रन्थमेवार्थो ग्रन्थार्थः, स पुनस्तथागता-गम्याख्यातो यथादर्शनं पर्यायार्थ एव स बहुविकल्पोऽपि, तथागतेः ।

(अथवेति) अथवा विकल्प एवम्भूतैकदेशः—अथवा विकल्पस्यैवम्भूतस्यैकदेशोऽयं नयः तस्य च—एवम्भूतस्य पर्यायास्तिकमेदत्वात्, अवयवार्थो गमयितव्यः पर्यायास्तिक इत्यत आह—परि समन्तादवगमः,—परिरुपसर्गः समन्तादर्थे अवतिर्धातुरवगमार्थः यथाह—'अव रक्षणगतिकान्तिप्रीतितृप्त्यवगमनप्रवेशश्रवण-स्वाम्यर्थयाचनक्रियेच्छादीप्त्यवाप्त्यालिङ्गनहिंसादहनभाववृद्धिषु' (धातुपाठ भ्वादिगण ६ १) अत्राव-गमस्य विवक्षितत्वात् नैःस्वाभाव्यात् परिशेषोऽवगमः—यदीदृशमाणस्य बाह्यार्थस्य विज्ञानव्यतिरिक्तस्य सर्वथा-ऽतिरिक्तस्याभावाद् अवगममात्रं विज्ञानमात्रमेवेत्यर्थः, सोऽस्यास्तीति मतिरस्येति—स पर्यायो अस्यास्तीति मतिः

पुरुष भवति विज्ञानं [illegible] विज्ञानमात्रमेवेति भावार्थः । बाह्यार्थस्तु [illegible] यदि न विज्ञानं तर्हि [illegible] विज्ञानसाधि[illegible]व्यतिरिक्त[illegible]—एवं तर्हीति । [illegible] विज्ञानमिदं कल्पनामात्रमेव विज्ञाने बाह्यनिरपेक्षे नियमेन स्थापिते हि एवं [illegible] [illegible] कल्पनामात्रमेव विज्ञाने हि [illegible] निरुपमा [illegible] [illegible], [illegible] भाव । एवं [illegible] [illegible] पुरुषानुसंहृतिरिति, [illegible] पौर्वापर्येण [illegible] [illegible] वाक्यार्थः [illegible] [illegible] इति भाव । [illegible] अथवेति । [illegible] [illegible] [illegible] परीति, परिशब्द समन्तादर्थे [illegible] इति भाव । [illegible] [illegible] नैःस्वाभाव्यादिति [illegible] [illegible] [illegible] [illegible] इति [illegible] इति भाव । [illegible]

1 सि० प० क० डे० । [illegible] । 2 [illegible]

स नयः, पर्ययोऽयीतः पद्मकारोऽपि, 'अस्तिनास्तिदिष्टं मतिः' (पाणि० अ० ४ पा० ४ सू० ६०) इत्यिठञ्प्रत्ययान्तरूपसिद्धेः, पर्यय एवास्तीति मन्यमानः पर्यायास्तिकोऽयं नयः, स च भाव –अर्थः शब्दो वा, वाच्य[वाचक]मिमतं विज्ञानरूपमेव वस्तिक्ययत आह–भावोऽपि भाव एव–भवतीति भावो घटपटादि द्रव्यगुणकर्मादि वा इति भावनीयेति भाव एव उपयोगो भावो न द्रव्यादीति, स च भावः क्षायिकः क्षायोपशमिक औपशमिकः पारिणामिको वा, स चोपयोग एव साकारोऽनाकारो वा समाप्यसमाप्यमानस्य निर्विकल्पशून्या, तस्मात् पर्यायास्तिकनयभेद एवम्भूतैकदेशोऽयमविशुद्धविज्ञानपर्यायमात्रग्राही नयोऽयमिति, यथा निक्षेपविविक्तस्येष्वाद्येषु पदेषु द्रव्यास्तिकेषु पर्ययशब्दो द्रव्यप्राधान्यात् तदर्थत्वेन व्याख्यातः तथेहाप्यारब्धेष्वेषूभयोभयनिक्षेपेषु द्रव्यशब्दः पर्ययप्राधान्यात्तदर्थत्वेन गमयितव्यः अत आह– द्रव्यशब्दश्चैव पदेष्वपीत्यादि, दुर्गतिरिति, दु द्रु गतौ द्रुशब्दो गत्यर्थः तस्मात्–गतेर्विकारे यत्प्रत्यये कृते द्रव्यमिति रूपं भवति, द्रव्यमेवार्थो द्रव्यार्थः, स पुनस्तथा तथा–तेन तेन प्रकारेणातीतोभयोभयादिविकल्पेषु नयेषु प्राग् व्याख्याताः यथायद् दर्शन–यथादर्शनं तेषां पण्णां स्वेन स्वेन दर्शनेन पर्यायार्थ एव स षड्विकल्पोऽपि, तथागतेः–तथा तथा परितो गमनात् ।

किमेतत् स्वाभिप्रायविरचमात्रम् ? आहोस्विदस्य दर्शनस्योपनिबन्धनमार्षमप्यस्तीत्यतोऽभ्यधे भवतीयम्—

निबन्धनमस्य 'से किं तं भावक्खंधे ? २ दुविहे पण्णत्ते तं जहा–आगमतो अ, नो आगमतो अ, से किं तं आगमतो भावक्खंधे ? २ जाणये उवउत्ते सेत्तं आगमतो भावक्खंधे' (अनु० सू० ५४–५९) इति, आगमभावस्कन्धादेरुपयोगलक्षणस्य विज्ञानस्वरूपमात्रत्वात् सर्वमुपयोग एव, अयं नियमस्यापि क्षणिकवादस्य नियमः, यदपि क्षणिकं वस्तु विज्ञानमेवेति नियमानियमभङ्गे द्रष्टव्यः ।

पर्यया इत्याह–पर्यय इति । स पर्ययो भाव एव सर्वोऽपुनरत इत्याह–स चेति । एतदेवाभिमतं भावमाह–अर्थ इति शब्दो वा भवन्तौ वा सर्वं विज्ञानलक्षणमेव तदेव विज्ञानं वाचकमपि वाच्यमपीति भावः । भावोऽपीति पर्ययशब्दवाच्याभिमतोऽपि भावो भवतीति भाव इति व्युत्पत्त्या न घटपटादिर्द्रव्यादिर्वा विवक्षितः किन्तु भाव एव–उपयोग एव भाव इति भावः । तमेवभावमेवाह–स च भाव इति । स चोपयोग एवेति विज्ञानरूप उपयोग एव साकारो वा निराकारो वा सन् किन्तु समाप्यसमाप्यमानस्वरूपोऽयमभिमतस्तस्मो विकल्प एवेति भावः । अन्यानिक्षेपमत्स्यविशुद्धविज्ञानमात्रानुगमात्तदयं नयः पर्यायास्तिकनयभेदैकदेशीयत्वेन उच्यत इत्याह–तस्मादिति । यथा पाश्चात्यदर्शनेष्वाद्ये षष्ठी निक्षेपादिनयानामपि पर्ययार्थिकत्वत्वानुसृत्या पर्ययशब्दस्य द्रव्यपरत्वं व्याख्यातं तथैवोभयोभयादिनयानामपि द्रव्यार्थिकत्वेन द्रव्यशब्दस्य पर्यायपरत्वमुपपाद्य व्याख्यमित्याह–यथेति । द्रव्यशब्दस्य पर्यायार्थता दर्शयति–द्रव्यशब्दश्चैव इति, पर्यायार्थिकनयस्तु प्रयुक्तद्रव्यार्थिकनयसम्मतस्वरूपलक्षणमेवेच्छति द्रव्यशब्दार्थमाह पतिनिरुद्धः विकाराश्च पर्याया एव उभयोभयादिनयेषूक्ताः तत्तद्दर्शनानुसारेण व्याख्याताश्च तत्र तत्र व्याख्यातम्, तेन तेन प्रकारेण गमनादिति भावः । विज्ञानमात्रप्रतिपादकमेतन्मतं केवलं स्वाभिप्रायमात्रकल्पितं न भवति अत्र मूलसूत्रमाप्तवचनमप्यस्तीत्याह–निबन्धनमस्येति । अयमत्र भावस्कन्ध

(नियमनमिति) नियम्यतमस्य 'से किं तं भावज्झयणे इति प्रश्नोपक्रमो प्रश्नो यावत् 'सेत्तं आगमओ भावज्झयणे (अनु० सू० ५४-५५) इति व्याकरणोपसंहारः आगमभावाध्ययनसोपयोगाध्ययनस्य विज्ञानस्वरूपमात्रत्वा[दा]विर्भावरूपमावश्यकं सामायिकमध्ययन-नामादिनिक्षेपानुक्रमेणाधिगमनीयं यत्किञ्चित् तत्सर्वमागमतः उपयोग एव—ज्ञानमेवेत्यर्थः, अथ नियमस्यापि क्षणिकवादस्य—क्षणिकमेव वस्तु इत्यस्यापि दर्शनस्य नियमः—यदपि क्षणिकं वस्तु विज्ञानमेव—न रूपादि तद्व्यतिरिक्तं बाह्यमस्ति किं तर्हि ? विज्ञानस्य विपरिणामविजृम्भितमात्रमेवेति, नियमनियमभङ्गो नामाऽऽरको विधिभङ्गादारभ्य गण्यमानो द्वादशो भङ्गः ।

द्वादशारनयचक्रस्य श्रीमन्मल्लवादिकृतस्य टीकायां श्रीमत्सिंहसूरि
गणिविरचितायां समाप्तः ॥

उपयोग उच्यते स च विज्ञानमात्रस्वरूप एवेत्यतः आगमभावाध्ययनमेवेति । भावरूपाद्वैतमिति... विज्ञानरूपत्वात् आविर्भावादिति । एवमागमस्य उपयोग एवेति योऽर्थं नियमोऽत्र क्रियते स नियमस्यापि—क्षणिकवादस्यापि भवति क्षणिकवस्तुवादाभिमतं क्षणिकं वस्त्वपि विज्ञानमेव न ततो व्यतिरिक्तं रूपादीति दर्शयति—अयं नियमस्यापीति । तस्मादयं—नियमनियमभङ्ग इति ।

इति विजयलब्धिसूरिविरचिते विषमपदविवेचने नयचक्रस्य द्वादशो
नियमनियमभङ्गः समाप्तः ॥

---

१ सि भ पा डे °स्यात्वं मि° । २ सि भ पा डे °मवमाने ।

अथ द्वादशभङ्गस्यान्तरम्

विध्यादिसर्वभङ्गात्मकैकश्रुतिसम्यग्दर्शनाधिकारे मतैकश्रुतिमिथ्यादर्शनत्वापादनार्थं प्रवृत्तत्वादाह—

एतदपि पूर्ववदेवैकान्तत्वादयुक्तम्, सम्भवविकल्पानुपपत्तेः, एवं सर्वं निःस्वभावमित्येवं ब्रुवतस्तव विज्ञानवचसोरपि सर्वान्तःपातित्वाभिःस्वभावत्वेऽप्रत्यायनप्रसङ्गात् परप्रत्यायनमयुक्तम्, विज्ञानवचसोर्निश्चितपक्षादित्वेनाभूतत्वादुन्मत्तप्रलापविज्ञानवत्, अथ मा भूदेष दोष इति सस्वभावे विज्ञानवचसी अभ्युपगच्छसि ज्ञानवचनस्वभावस्याभ्युपगमेनाभ्युपगमविरोधः, इदानीं सस्वभावस्याभ्युपगमादिति स्ववचनविरोधश्च ।

(एतदपीति) एतदपि पूर्ववदेवैकान्तत्वादयुक्तम्—यथा क्षणिकमेव रूपादिसमुदाय एव सामान्यविशेषै[कत्वा]न्यत्वादीनीमेऽन्यथावादानामयुक्तत्वमेकान्तत्वात्, युक्तत्वे वा जैनेन्द्रत्वम्, अनेकान्तप्रतिज्ञाभित्वादेत्युक्तम्, एवंसदपि सर्वं निःस्वभावमिति मतम्, कस्मात् ? सम्भवविकल्पानुपपत्तेः—अस्मिन्नपि मते ये विकल्पाः सम्भवन्ति समासेन विज्ञानवचसोः निःस्वाभाव्य स्वाभाव्य येऽनयोरेव भेदा वक्ष्यमाणास्ते सर्वथा नोपपद्यन्ते, तदनुपपत्तेरस्यापि मतस्यायुक्तिरेवो जिनकल्पितानेकान्तरूपस्य वस्तुनः भव इत्युपसंहारो भविष्यति, तद्यथा एवं सर्वं निःस्वभावमिति ब्रुवतोऽवीतासिद्धादिप्रकारेण तवेति मत्पुत्राण प्रथमैकंग्रन्थात् द्वितीयेऽपक्षम्याद्विज्ञानवचसोरपि स्वयोक्तयोः सर्वान्तःपातित्वादविशेषेण सर्वं

